वर्षम्-०३ अङ्कः-०३
जनवरी-दिसम्बर, २०२१

शोधज्योतिः
ISSN-2350-0700

# ज्योतिषशास्त्रदृष्ट्या नेत्ररोगविचारः

**सुश्री अपूर्वा अग्रवालः[१]**

**"ज्योतिषामयनं चक्षुः"**[२] इति महर्षिपाणिनेः वचनानुसारं वेदपुरुषस्य शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति षट्स्वङ्गेषु ज्योतिषशास्त्रम् नेत्रस्वरूपम्। शास्त्रमिदं भूत-वर्तमान-भविष्येति त्रिषु कालेषु समस्तचराचरजगति राशि-ग्रह-नक्षत्र-तारादीनां ज्योतिष्पिण्डानां शुभाशुभफलानि दर्शयतीति कारणाच्चक्षुत्वेनाङ्गीक्रियते। यतोहि शरीरस्य सर्वेष्वङ्गेषु नेत्रस्य प्राधान्यं वर्तते तदर्थं षट्स्वेतेषु वेदाङ्गेषु चक्षुरूपत्वाज्ज्योतिषशास्त्रस्य स्थानं मूर्धनि वर्तते। यथाह सिद्धान्तशिरोमणौ–

**वेदचक्षुः किलेदं स्मृतं ज्यौतिषं मुख्यता चाङ्गमध्येऽस्य तेनोच्यते।**
**संयुतोऽपीतरैः कर्णनासादिभिश्चक्षुषाऽङ्गेन हीनो न किञ्चित्करः॥**[३]

भास्कराचार्येण प्रतिपादितसिद्धान्तानुसारमिदं स्पष्टं भवति यत्मानवशरीरे कर्ण-नासिका-मुख-हस्त-पादादीतरेषु सर्वाङ्गेषु नेत्रमेकं विशिष्टमङ्गम्। नेत्रेण विहीनः नरः किमपि कार्यं कर्तुं न क्षमो भवति। नेत्रेण रहितस्य मानवस्य जीवनमन्धकारमयं भवति।

आधुनिकतकनीकिसमयेसर्वविधकार्याणि सङ्गणकयन्त्रं, चलदूरभाषयन्त्रमित्यादीनां प्रयोगेनैव सम्पाद्यन्ते। प्रायः सर्वे जनाः, लघु लघु बालका अप्यधिकाधिकमेतेषां यन्त्राणामुपयोगं कुर्वन्ति। परिणामतः सम्प्रति नेत्ररोगः सामान्योऽभवत्। अल्पायुषः बालका अप्युपनेत्रं धरन्ति। अतः नेत्ररोगविचार आवश्यकः।

---

[१] सहायिकाचार्या, ज्योतिषविभागः, श्रीसोमनाथसंस्कृतविश्वविद्यालयः, वेरावलम्, गीर-सोमनाथः, गुजरातम्, चलदूरवाणी-8770064783, e-mail – apoorvaag0211@gmail.com

[२] पाणिनीय शिक्षा-41

[३] सिद्धान्तशिरोमणिः कालमानाध्यायः-11

ज्योतिषशास्त्रं सिद्धान्त-संहिता-होरेति स्कन्धत्रयेषु विभक्तम्। तत्रापिहोरास्कन्धस्यान्तर्गतं जन्मकुण्डलीद्वारा फलविचारः क्रियते। जन्मकुण्डल्यां राशिषु, भावेषु च सूर्यादिनवग्रहाणां स्थित्यनुगुणमनेकविधयोगाः सञ्जायन्ते, तेषु योगेषु नेत्ररोगसम्बन्धितयोगोऽपि विद्यते।

## नेत्ररोगकारकभावाः

**वित्तं नेत्रं मुखं विद्या वाक्कुटुम्बाशनानि च।**
**द्वितीयस्थानजन्यानि क्रमाज्ज्योतिर्विदो विदुः॥**[४]

जन्माङ्कचक्रे लग्नादि-द्वादशभावा भवन्ति। तेषुद्वितीयभावाच्चक्षुषः विचारः क्रियते। किन्तु प्रायः सर्वेषामाचार्याणां मतानुसारं दक्षिणनेत्रस्य विचारः द्वितीयभावाद्वामनेत्रस्य च विचारः द्वादशभावात्क्रियते।

एतेन सह षष्ठ-अष्टमेत्यशुभभावाभ्यां, लग्नभावादपि चक्षुरोगः विचार्यते।

## नेत्ररोगकारकग्रहाः

**चक्षोः सूर्यो अजायत**[५] इति वैदिकमन्त्रानुसारं सूर्यस्योत्पत्तिः विराटपुरुषस्य चक्षुषोऽभूत्तदर्थं **सूर्यो यथा सर्वलोकस्य चक्षुः**। अतः सूर्यः नेत्ररोगस्य मुख्यः कारकग्रहोऽस्ति। चन्द्रः, शुक्रः, द्वितीयेशः, द्वादशेशश्चापि नेत्ररोगकारका वर्तन्ते। एतदतिरिच्य शनिभौमाविति पापग्रहौ, षष्ठेशोऽष्टमेशश्च संयोगवशात्कारकाः भवन्ति।

## नेत्रविचारः

**नेत्रेशे बलसंयुक्ते शोभनाक्षो भवेन्नरः।**
**षष्ठाऽष्टम-व्यय-गते नेत्रे वैकल्यमादिशेत्॥**[६]

**नेत्रेश्वरे शुभयुते शुभदृष्टियुतेऽथवा।**
**शुभांशकस्थिते वाऽपि शुभदृक् स नरो भवेत्॥**[७]

---

[४]जातकपारिजातः-11/49

[५]शुक्लयजुर्वेदः- 31/12

[६]बृहत्पाराशरहोराशास्त्रम्-14/13

[७]जातकपारिजातः-11/69

अर्थाद्द्वितीयभावस्याधिपतिर्ग्रहः बलवान् भवति चेज्जातकस्य सुनेत्रं, किञ्च स एव द्वितीयेशः लग्नात् षष्ठ-अष्टम-द्वादशेति त्रिकस्थानेष्वन्यतमे भवति चेत्तस्य रोगयुक्तं नेत्रं भवेत्। द्वितीयेशः शुभग्रहेण युतो दृष्टो वा स्यादथवा शुभग्रहस्य नवांशगतः स्यात्तदा जातकायशुभदृष्टिं यच्छति।

किञ्च द्वितीयेशः लग्नात्त्रिकस्थानेष्वन्यतमे भूत्वा शुभग्रहैः वीक्षितो भवति चेत् सामान्यतया नेत्ररोगः वक्तव्यः।

अपि च –

**नेत्रे शुभे तद्भुवनेश्वरे वा सौम्यान्विते कारकखेचरेन्द्रे।**
**लग्नेश्वरेणापि युतेऽथ दृष्टे विशालदृष्टिः स नरो विशेषात्॥**[८]

सर्वार्थचिन्तामणिकारः कथयति यत् लग्नाद्द्वितीयस्थाने शुभग्रहः स्यात्, द्वादशेशोऽपि शुभः भूत्वा शुभग्रहेण, लग्नेशेन च युतो दृष्टो वा भवेत्तदा जातकस्य विशेषतया विशालदृष्टिर्भवति।

एवमेव सौम्यग्रहेण समन्वितो द्वादशभावस्याधिपतिः शुभषष्ट्यंशेन युक्तः स्यादथवा शुभग्रहेण सम्बन्धितः स्यात्तदापि जातस्य नेत्रं कुशलं ज्ञेयम्। इतः व्यत्ययेन पापस्थितिगतेन द्वादशेशेन चक्षुरोगं जानीयात्।

## नेत्ररोगकारकयोगाः

शुक्रः चन्द्रेण सह त्रिकभावेषु (6,8,12 इति पापस्थानेषु) विद्यमानश्चेत् समुद्भवः जातकः निशान्धः एवञ्च लग्नेश्वरः सूर्यशुक्राभ्यां समन्वितो भूत्वा तेषु त्रिकभावेषु गतश्चेत् जातः जन्मान्धः भवतीति वदेत्।

एवं पूर्वोक्तप्रकारेण यदि द्वितीयेशो द्वादशेशश्च शुक्र-लग्नेशाभ्यां सहितं षष्ठाष्टमव्ययेति त्रिकस्थानेषु स्थितौ स्यातां तदा योगेऽस्मिन्नुद्भूतः मानवः नेत्ररोगी भवेदेवञ्च पापग्रहेण, शुक्रेण च समन्वितस्य चन्द्रस्य स्थितिः धनस्थाने भवति चेन्मानवः नेत्रहीनो जायते। तद्यथा-

**शुक्रसेन्दुश्चेत्त्रिकस्थो निशान्धो लग्नस्वामी सार्कशुक्रः सदान्धः॥**
**त्रिकगतौ व्ययवित्तपती यदा तनुपशुक्रयुतौ नयनामयः।**
**धनगतः सखलः कविसंयुतो हिमकरो यदि नेत्रविवर्जितः॥**[९]

---

[८]सर्वार्थचिन्तामणिः-3/6

[९]भावप्रकाशः धनभावफलम्-1,2

योगोऽयं जातकालङ्कारेऽपि तथैव प्राप्यते –

**स्वान्त्याधीशौ त्रिकस्थौ कवितनुपयुतौ स्यात्तदा नेत्रहीनः।**
**चन्द्रः पापेन युक्तो धनभवनगतः शुक्रयुङ्नेत्रहीनः॥**[१०]

अपि च लग्नस्थौ चन्द्रभौमौ गुरुशुक्राभ्यामीक्षितौ चेज्जातकस्य काणाक्षि वदेत्। एवञ्च लग्नेऽष्टमे वा गतस्य शुक्रस्योपर्यशुभग्रहाणां दृष्टिर्भवेच्चेज्जातकाय अश्रुपातस्य कारणान्नेत्रपीडा वक्तव्या।

तथैव पापग्रहैर्वीक्षितोऽन्वितो वा सूर्यः पञ्चम-नवम-द्वादशेष्वन्यतमे स्थाने स्थितो भवति चेदुत्पन्नस्य जातकस्याक्षिणौ विकलौ ज्ञेयौ यथा कथयति जातकालङ्कारकारः –

**मार्तण्डे रिष्फयाते तदनु नवमगे पुत्रगे वा खलाढ्ये दृष्टे वा स्यान्मनस्वी सुविकलनयनः॥**[११]

लग्नस्थाने सिंहराशौ सूर्यचन्द्रौ स्थितौ स्यातां तयोरुपरि मंगलशनयोः दृष्टिर्भवति चेज्जातकः नेत्रविवर्जितोऽन्धः स्यात् किन्तु योगेऽस्मिन् सूर्यचन्द्रयोरुपरि क्रूराक्रूरग्रहाणां पापशुभेति मिश्रितदृष्टिर्भवति चेज्जातकस्य बुद्बुदलोचनः ज्ञातव्यः। तथा च लग्नाद्व्ययस्थाने सूर्यस्य स्थितिः जातकस्य दक्षिणाक्षिणः नाशं करोति किञ्च द्वादशभावे स्थितेन चन्द्रेण वामनेत्रं विनश्यति। अनेन प्रकारेण सूर्यचन्द्रौ सहैव द्वादशभावे स्थितौ भूत्वा जातस्य दक्षिणवामेति द्वयप्यक्षिणी विनाशयतः। एते नेत्रसम्बन्धिताशुभयोगाः शुभग्रहैरवलोकिताः स्युस्तदा न दोषकराः भवन्ति। यथा जातकपारिजाते वर्णितमस्ति –

**रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते**
**नयनरहितः सौम्यासौम्यैः सबुद्बुदलोचनः।**
**व्ययगृहगतश्चन्द्रो वामं हिनस्त्यपरं रवि-**
**र्न शुभगदिता योगा याप्या भवन्ति शुभेक्षिताः॥**[१२]

प्रस्तुतोऽयं योगः किञ्चितपरिवर्तनेन मन्त्रेश्वराचार्येण फलदीपिकायामुक्तं यथा –

---

[१०]जातकालङ्कारः- 2/5

[११]तत्रैव- 3/23

[१२]जातकपारिजातः-6/52

**मन्दारान्वितवीक्षिते व्ययधने चन्द्रारुणौ चाक्षिरुक्।**[१३]

अर्थात् यदि सूर्यचन्द्रौ लग्नाद्द्वादशभावे द्वितीयभावे वा स्थितौ भवेतां तथा तयोरुपरि शनिभौमयोरशुभदृष्टिः भवेत्तदा नेत्ररोगः जायते।

विषयेऽस्मिन् आचार्यवराहमिहिरस्य वचनमिदं यत् सूर्य-चन्द्र-भौम-शनयः एते चत्वारो ग्रहाः लग्नस्थानाद् अष्टम-षष्ठ-द्वितीय-द्वादशेति चर्तुर्षु भावेषु स्थिताः स्युस्तदा तेषु यः सर्वाधिको बलयुक्तो ग्रहो भवति तस्य दोषवशाज्जातकस्य नेत्रहानिः स्यात् –

**निधनारिधनव्ययस्थिता रविचन्द्रारयमा यथा तथा।**
**बलवद्ग्रहदोषकारणान्मनुजानां जनयत्यनेत्रताम्॥**[१४]

योगमेनम् आचार्यः श्रीवैद्यनाथोऽपि स्वीये ग्रन्थे वर्णयति यथा –

**षष्ठे चन्द्रेऽष्टमे भानौ लग्नादन्त्यगतेऽर्क्कजे।**
**वित्तस्थानगते भौमे शक्रोऽप्यन्धो भवेद् ध्रुवम्॥**[१५]

अर्थाच्चन्द्रः जन्मलग्नात् षष्ठे भावे, सूर्योऽष्टमस्थाने, शनिः द्वादशस्थाने तथा च भौमः द्वितीयभावे स्थिताः भवन्ति चेद् योगेऽस्मिन् प्रसूतो जातकः इन्द्रसदृशं भूत्वापि निश्चयेन चक्षुर्भ्यामन्धो भवेदिति।

यस्य जातकस्य जन्मकुण्डल्यां द्वितीयेशः लग्नस्थाने अथवा कस्मिन्नप्येकस्मिन् भावे शुक्र-चन्द्राभ्यां साकं स्थितः स्यात्तदा जातकः रात्र्यन्धः भवेत्किञ्च स एव द्वितीयेशः स्वोच्चराशिगतः भूत्वा बुध-गुर्वेति शुभग्रहैः समन्वितो भवति तदा जातकः रात्र्यन्धत्वं नाप्नोति। अपि च यस्य जन्मकुण्डल्यां सूर्य-शुक्र-लग्नेशाः अस्तङ्गताः भवेयुस्तस्य नेत्रं साधारणमेति वाच्यम्। तद्यथा –

**शुक्रेन्दुनयनाधीशैरेकस्थैस्तु निशान्धकः।**
**सूर्यशुक्रविलग्नेशैरदृश्यैर्मध्यलोचनः॥**[१६]

---

[१३]फलदीपिका-14/10

[१४]बृहज्जातकम्- 21/10

[१५]जातकपारिजातः-6/58

[१६]जातकपारिजातः-11/65

जातकस्य जन्मकुण्डल्यां शनिना युतोऽवलोकितो वा सूर्यः लग्नस्थः सप्तमस्थो वा भवेच्चेज्जातकस्य दक्षिणचक्षुः शीघ्रमेव नष्टं करोति किञ्च सूर्यः लग्ने सप्तमे वा स्थित्वा राहुभौमाभ्यां सहितो भवति चेत्तस्य वामचक्षुः विनाशयति।

यदि द्वितीयभावस्याधिपतिर्ग्रहः सूर्य-शुक्र-लग्नेश्वरैः सह षष्ठ-अष्टम-व्ययेति त्रिकस्थानेष्वन्यतमे गतः स्यात्तदा जातकः जन्मतोऽन्धो भवेत्। तथैव लग्नाद्द्वादशभावे भौमस्यस्थितिर्भवति चेद्वामनेत्रस्य किञ्च तत्र द्वादशस्थाने शनिः भवति चेद्दक्षिणनेत्रस्य नाशं करोति। यथोच्यते सर्वार्थचिन्तामणिकारः –

**भान्वच्छलग्नपतिभिः सहिते तदीशे जात्यन्धको भवति रन्ध्रव्रणान्त्यगेऽपि।**
**रिष्फे धरासुतगते नयनं हि वामं नाशं तदा व्रजति सूर्यसुते तदन्यत्॥**[१७]

पुनः सर्वार्थचिन्तामणिकारः आचार्यः श्रीवेङ्कटेशशर्मा कथयति यज्जातकस्य जन्मकुण्डल्यां द्वितीयभावः पापग्रहैः समन्वितो भवेत्तथा तस्याधिपतेरुपरि शुभग्रहाणां दृष्टिर्भवेच्चेज्जातस्य निमीलितं नेत्रं भवति। एवञ्च यदि शनिना दृष्टः लग्नाधिपतिः बहुपापग्रहैः युक्तः स्यात्तदा योगेऽस्मिन् प्रसूतो जातकः विकारयुक्तं लोचनमाप्नोति। तथैव द्वितीयभावे शनिग्रहेणावलोकिताः अधिकाः पापग्रहाः स्थिताः स्युस्तदापि प्रसूतो जातकः नेत्ररोगी भवतीति जानीयात्।

द्वितीयभावस्य स्वामिग्रहः शनिभौमाभ्यां सह गुलिकेनापि युक्तो भवति चेत् नेत्ररोगः जायते–

**शन्यारयोगे गुलिकेन युक्ते नेत्रेश्वरे तत्र तु नेत्ररोगः॥**[१८]

पञ्चमेशेन षष्ठेशेन च युक्तः शुक्रः लग्नगतो भवति चेत् राज्ञः कोपकारणान्नेत्रविकारो जायते। तथा यदि लग्न-द्वितीय-सप्तम-नवम-पञ्चमेति भावानामधिपतिग्रहाः लग्नात् षष्ठाष्टमव्ययेति त्रिकस्थानेषु स्थिताः स्युरपि च लग्नभावेन सह शुक्रस्य सम्बन्धो(युतिर्दृष्टिर्वा) भवेत्तदोद्भूतो जातकः नेत्राभ्यां रहितो भवति।

जन्मकुण्डल्यां लग्नस्थाने सूर्यो भवति चेज्जातकः रूक्षनेत्रयुक्तो भवति किञ्च सूर्यस्य स्थितिः कर्कराशिगतलग्ने भवति चेज्जातकस्य स्फोटनेत्रं ज्ञेयम्। स एव सूर्यः लग्नभावे स्वोच्चस्थाने मेषराशौ गते सति नेत्ररोगं करोति किञ्च सूर्यः स्वगृहे सिंहराशौ स्थितः भूत्वा लग्नगतो भवति चेज्जातकं रात्र्यन्धं करोति –

---

[१७] सर्वार्थचिन्तामणिः- 3/3

[१८] जातकपारिजातः-11/68

**लग्नेऽर्के - - - - लोचनरूक्षकः - - - - - - - - - - - - -।**
**स्फोटाक्षः शशिभे क्रिये सतिमिरः सिंहे निशान्धः पुमान्॥**[१९]

सूर्य-मंगल-शनि-राहु-केतव एतेषां पापग्रहाणां षष्ठाष्टमस्थानयोः स्थितिवशान्नेत्रहानिः भवति। अत्रापि विशेषतया षष्ठभावे पापग्रहाः स्युस्तदा वामनेत्रस्य किञ्चाष्टमभावे एते पापग्रहाः भवेयुश्चेद्दक्षिणनेत्रस्य नाशं कुर्वन्ति। यथा–

**षट्छिद्रगाश्चाक्षि हरन्ति पापाः सव्यं रिपौ दक्षिणमष्टमस्थाः॥**[२०]

भौमः द्वितीयभावस्याधिपतिर्भूत्वा एकस्मिन् स्थाने स्थितयोः सूर्यचन्द्रयोः अष्टमभावे गतः स्यात्तथा च शनिः लग्नात् षष्ठभावे द्वादशभावे वा गतश्चेज्जातस्यान्धत्वं ज्ञेयम्। अपि च यदि चन्द्रः षष्ठाष्टमव्ययेष्वन्यते स्थित्वा शनिना भौमेन च समन्वितो भवति तदा योगेऽस्मिन्नुद्भूतो जातकः नष्टनेत्रः भवति –

**कुजे धनेशे निधने रवीन्द्वोः शत्रुव्ययस्थानगतेऽर्कजेऽन्धः।**
**रन्ध्रावसानारिगते शशाङ्के शनौ सभौमे यदि नष्टनेत्रः॥**[२१]

पुनः आचार्यः श्रीवेङ्कटेशशर्मा पित्तकोपेन नेत्ररोगयोगमाह –

**नेत्रेश्वरस्यांशपतौ सपापे पापग्रहक्षेत्रगते तथैव।**
**नेत्राधिपे वासरनायके तु धरासुते वा गुलिकार्कदृष्टे॥**
**उष्णोद्भवेनाप्यथ पित्तकोपैर्नेत्रस्य रोगो भवति प्रमादैः।**[२२]

अर्थात् द्वितीयेशः यस्मिन्नवांशे भवति तस्याधिपतिर्ग्रहः पापग्रहस्य राशौ भूत्वा पापग्रहेण समन्वितो भवेदथवा द्वितीयभावस्याधिपतिर्ग्रहः सूर्यः भौमो वा भवेत्तथा गुलिकस्योपरि सूर्यस्य दृष्टिः स्यात्तदा एतयोः द्वयोः योगयोः समुद्भूतस्य जातकस्य चक्षुषि उष्णतावशादथवा पित्तप्रकोपवशात् रोगो भवति।

एवं प्रकारेण जन्मकुण्डल्याधारेण जातकस्य पित्रादिकानामप्यन्धकत्वं विचार्यते। यथोक्तं –

---

[१९]फलदीपिका- 8/1

[२०]जातकपारिजातः-6/54

[२१]जातकपारिजातः-6/57

[२२]सर्वार्थचिन्तामणिः- 3/8-9

**एवं तातानुजाम्बासुतनिजगृहिणीस्थाननाथाः स्थिताश्चेदा-**
**देश्यं तत्र तेषां प्रवरमतियुतैरन्धकत्वं तदानीम्॥**[२३]

अर्थात् जन्मकुण्डल्यां तातादीनां (पिता-माता-सहोदर-पुत्र-जायादीनां) यन्निर्धारितस्थानानि सन्ति तेषामधिपतयः सूर्य-शुक्र-चन्द्रैः सह त्रिकस्थानेषु षष्ठाष्टमैकादशेष्वन्यतमे पापस्थाने भवेयुस्तदा तेषां तातादीनामन्धकत्वं भवति। यथा जन्माङ्कचक्रे मातुः विचारः चतुर्थभावात् क्रियते अतः चतुर्थभावेशः त्रिकस्थानेष्वन्यतमे सूर्यचन्द्रशुक्रैरन्वितो भवति चेज्जातकस्य मातुरन्धकत्वं वक्तव्यम्। तथैव सप्तमभावात् भार्यायाः विचारः क्रियते अतः यदि सप्तमभावस्य स्वामी षष्ठाष्टमैकादशेष्वन्यतमे सूर्यशुक्रचन्द्रैः सह स्थितो भवति तदा जातकस्य भार्या अन्धकत्वं प्राप्नोतीति।

एते सर्वे नेत्ररोगसम्बन्धिताः महत्त्वपूर्णयोगाः सन्ति। अनेन प्रकारेण सामान्यतया जन्मकुण्डल्यां द्वितीय-द्वादशेति नेत्ररोगकारकभावेषु, षष्ठाष्टमैकादशादिष्वशुभभावेषु, केन्द्रत्रिकोणादिषु शुभभावेषु च सूर्य-चन्द्र-भौम-शुक्र-शनि-द्वितीयेश-द्वादशेशादि-नेत्ररोगकारकग्रहाणां स्थित्यनुसारं जातकस्य नेत्रसम्बन्धितविविधरोगाणां विचारः क्रियते। यस्य जातकस्य जन्माङ्कचक्रे पूर्वोक्तेषु नेत्ररोगयोगेषु कोऽपि योगः विद्यते चेत् पूर्वस्मादेव विविधोपायैः तस्मात् रोगात् मुक्तो भवितुं शक्यते।

यथानेत्ररोगविचारक्रमे सूर्यग्रहस्य प्रधानता भवति। मुख्यतया सूर्यस्य बलाबलेन नेत्ररोगः विचार्यते तदर्थमेव समस्तज्ञानस्य आद्यस्रोते वेदेऽपि चक्षुषोपनिषद् स्तोत्रं, सूर्यसूक्तं, सूर्यमण्डलस्तोत्रमित्यादयोऽनेके मन्त्राः दरीदृश्यन्ते, येषु नेत्ररोगस्य निवृत्तये, नेत्रज्योत्यभिवृद्धये च सूर्यदेवस्याराधना कृतास्ति। यथा कृष्णयजुर्वेदीय-चक्षुषोपनिषदि –

**ॐ चक्षुश्चक्षुश्चक्षुश्तेज स्थिरो भव। मां पाहि पाहि।**
**त्वरितम् चक्षुरोगान् शमय शमय। मम जातरूपं तेजो दर्शय दर्शय।**
**यथाऽहमन्धो न स्यां तथा कल्पय कल्पय।**
**कल्याणं कुरु कुरु। यानि मम पूर्वजन्मोपार्जितानि**
**चक्षुःप्रतिरोधकदुष्कृतानि सर्वाणि निर्मूलय निर्मूलय।**
**ॐ नमश्चक्षुस्तेजोदात्रे दिव्याय भास्कराय।...........**

अपि च ऋग्वेदस्य दशमे मण्डले –

**चक्षुर्नो देवः सविता चक्षुर्न उत पर्वतः।**
**चक्षुर्धाता दधातु नः॥**

---

[२३]जातकालङ्कारः- 2/6

**चक्षुर्नो धेहि चक्षुषे चक्षुर्विख्यै तनूभ्यः।**
**सं चेदं वि च पश्येम॥**
**सुसंदृशं त्वा वयं प्रति पश्येम सूर्य।**
**वि पश्येम नृचक्षसः॥**[२४]

एतेषां मन्त्राणां नियमितोच्चारणेन, सूर्योपासनया च नेत्ररोगात् मुक्तिर्सम्भवति। एतदतिरिच्य ग्रहस्य शान्तिविधिः, रत्नधारणं, जपादयोऽनेकविधोपाया अपि नेत्रसम्बन्धितरोगेभ्यः मुक्तिप्राप्त्यर्थं कर्तुं शक्यन्ते।

मानवस्य सर्वेष्वङ्गेषु चक्षुषः महत्त्वमत्यधिकं वर्तते तदर्थं सम्प्रति तकनीकियुगे सर्वैः नेत्राभ्यामारोग्यतायै, नेत्रदीप्त्यभिवृद्धये च विशेषतया अवधानं दद्यादिति दिक्।

## सन्दर्भग्रन्थसूची

1. जातकपारिजातः, रचनाकारः- श्रीवैद्यनाथः, 'सुधाशालिनी' संस्कृतटीका तथा 'विमला' हिन्दीटीका सहितः, टीकाकारौ- पण्डितश्रीकपिलेश्वरशास्त्री तथा पण्डितश्रीमातृप्रसादशास्त्री, प्रकाशकः- चौखम्बा संस्कृत संस्थानम्, वाराणसी, सप्तं संस्करणम्, 1992
2. सर्वार्थचिन्तामणिः, रचनाकारः- श्रीवेङ्कटेशशर्मा, हिन्दीव्याख्याकारः- आचार्यगुरुप्रसादगौडः, प्रकाशकः- चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, प्रथमं संस्करणम्, 2006
3. फलदीपिका, रचनाकारः- श्रीमन्त्रेश्वराचार्यः, भावार्थबोधिनी, व्याख्याकारः- पं. गोपेशकुमार ओझा, प्रकाशकः- मोतीलाल बनारसीदास, वाराणसी, द्वितीयं संशोधितं संस्करणम्, 1975
4. जातकालङ्कारः, रचनाकारः- श्रीगणेशकविः, सान्वयः 'हरभानु'-संस्कृतटीकया 'प्रज्ञावर्धिनी' हिन्दीटीकया च विभूषितः, सम्पादकः व्याख्याकारश्च- डॉ.सत्येन्द्रमिश्रः, प्रकाशकः- चौखम्बा सुरभारती प्रकाशनम्, द्वितीयं संस्करणम्, 2003
5. बृहत्पाराशर-होराशास्त्रम्, रचनाकारः- श्रीपराशरमुनिः, सविमर्श 'सुधा' व्याख्यया विभूषितम्, सम्पादकः व्याख्याकारश्च- पं. देवचन्द्र झा, प्रकाशकः- चौखम्भा प्रकाशनम्, नवमं संस्करणम्, वि.सं. 2064
6. पाणिनीयशिक्षा, व्याख्याकारः- शिवराज आचार्यः कौण्डिन्न्यायनः, प्रकाशकः- चौखम्बा विद्याभवनम्, वाराणसी, प्रथमं संस्करणम्, 2015
7. भावप्रकाशः, रचनाकारः- श्रीजीवनाथदैवज्ञः, सान्वयः- 'प्रज्ञावर्द्धिनी' हिन्दीटीकोपेतः, सम्पादकः व्याख्याकारः- डॉ. सत्येन्द्रमिश्रः, प्रकाशकः- चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, संस्करणम् 2005
8. सिद्धान्तशिरोमणिः, रचनाकारः- श्रीमद्भास्कराचार्यः,'सूर्यप्रभा' हिन्दीटीकासहितः, व्याख्याकारः- पं. सत्यदेवशर्मा, प्रकाशकः- चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, संस्करणम् 2019

[२४]ऋग्वेदः- 10/158